लोके । पित्तस्य तस्य निरामस्य लक्षणमाह । "निरामं पित्तमाताम्रमत्युष्णं कटुकं सरम् । दुर्गन्धि रुचिकृद्वह्निबलवर्द्धनमीरितम्" ।

अथ सामकफस्य लक्षणमाह "आलस्यतन्द्राहृदयाविशुद्धिर्दोषाप्रवृत्त्या विड्मूत्रताभिः । गुरूदरत्वारुचिसुप्रताभिरामान्वितं व्याधिमुदाहरन्ति । आमज्वरे लङ्घनकोष्णपेयालघ्वन्नसूपौदनतिक्तयूषैः । विरूक्षणस्वेदनपाचनैश्च संशोधनैरूर्द्ध्वमधस्तथैव । तद्धि मारुततृष्णायां लङ्घनं कार्य्यमेव च" । तथा मुखशोषभ्रमावपि निरामयोरेव विवक्षितौ सामयोस्तु तयोर्लङ्घनं कार्य्यमेव, गुर्व्विणीबालवृद्धादिभिरपि निरामैरेव नैव लङ्घनं कार्य्यं सामैः पुनस्तैरपि लङ्घनं कार्य्यमेव । "क्षये धातुक्षये राजयक्ष्मणि च वातजे ज्वरे लङ्घनं न कार्य्यम् । ज्वरी लङ्घनेऽपि जलं पिबेदित्याह सुश्रुतः । "तृषितो मोहमायाति मोहात् प्राणान्विमुञ्चति । अतः सर्व्वास्ववस्थासु न क्वचिद्वारि वर्जयेत्" । हारीतेनोक्तम् "तृष्णा गरीयसी घोरा सद्यःप्राणविनाशिनी । तस्माद्देयं तृषार्त्ताय पानीयं प्राणधारणम्" । अवश्यं पेयमपि जलं ज्वरी किञ्चिद्वारयन् पिबेत् । यत आह सुश्रुत एव । "जीविनां जीवनं जीवो जगत्सर्व्वं तु तन्मयम् । अतोऽत्यन्तनिषेधेन न क्वचिद्वारि वारयेत्" । जीवनं जलं क्वचिन्न वारयेदेव तथा च, "ज्वरे नेत्रामये कुष्ठे मन्देऽग्नावुदरे तथा । अरोचके प्रतिश्याये प्रसेके श्वयथौ क्षये । व्रणे च मधुमेहे च पानीयं मन्दमाचरेत्" । मुखप्रसेके अल्पं पिबेत् मन्दमाचरेत् पिबेत् । यत आह "अतियोगेन सलिलं तृष्यतोऽपि प्रयोजितम् । प्रयाति श्लेष्मपित्तत्वं ज्वरितस्य विशेषतः" । तच्च जलं नवज्वरी शीतलं न पिबेदित्याह सुश्रुतः "नवज्वरे प्रतिश्याये पार्श्वशूले गलग्रहे । सद्यःशुद्धौ तथाऽऽध्माने व्याधौ वातकफोद्भवे । अरुचिग्रहणीगुल्मश्वासकासेषु विद्रधौ । हिक्कायां स्नेहपाने च शीतं वारि विवर्जयेत्" । अन्यच्च वर्ज्यमाह स एव "सेव्यमानेन शीतेन ज्वरस्तोयेन वर्द्धते" । अत्र शीतं जलं अक्वथितं निषिद्धम् । तथा सति क्वथितमायातम् । तत्र क्वथितस्य विधिर्गुणाश्च "क्वाथ्यमानं तु निर्व्वेगं निष्फेनं निर्म्मलं च यत् । तत्तोयं क्वथितं ज्ञेयं दोषघ्नं पाचनं लघु" । शनैः क्वथितस्य विधानमाह सुश्रुतः "वातश्लेष्मज्वरार्त्ताय हितमुष्णाम्बु तृष्यते । दीपनं स्यात्तु कफजे वातपित्तानुलोमनम् । तद्धि मार्दवकृद्दोषस्रोतसां शीतमन्यथा" । वाग्भटश्च "तृष्णायां प्रायमुष्णाम्बु पिबेद्वातकफज्वरे । तत्कफं विलयं नीत्वा तृष्णामाशु निवर्त्तयेत् । उदीर्य्य चाग्निं स्रोतांसि मृदूकृत्य विशोधयेत् । वातपित्तकफस्वेदशकृन्मूत्राणि सारयेत् । अथोष्णोदकस्य लक्षणं गुणाश्च "क्वाथ्यमानन्तु निर्व्वेगं निष्फेनं निर्म्मलं तथा । अर्द्धावशिष्टं यत्तोयं तदुष्णोदकमुच्यते । ज्वरकासकफश्वासपित्तवातामसेदसाम् । नाशनं पाचनञ्चैव पथ्यमुष्णोदकं सदा" ।

अथर्त्तुभेदे जलस्य पाकभेदः । "त्रिपादशेषं सलिलं ग्रीष्मे शरदि शस्यते" । "अन्ये तु निदाघे त्वर्द्धपादोनं पादहीनन्तु शारदम् । हिमेऽर्द्धशेषं शिशिरे तथा वर्षावसन्तयोः । शिशिरे च वसन्ते च हिमे चार्द्धावशेषितम् । अष्टमांशावशेषन्तु वारि वर्षासु शस्यते ।"

ज्वरविषये कश्चिदस्यावर्ज्यादिभेदः चक्रदत्त उक्तो यथा

"ज्वरितं ज्वरमुक्तं वा दिनान्ते भोजयेल्लघु । श्लेष्मक्षये विवृद्धोष्मा बलवाननलस्तदा । गुर्व्वभिष्यन्दिकाले च ज्वरी नाद्यात् कथञ्चन । न हि तस्याहितं भुक्तमायुषे वा सुखाय वा । लङ्घनं स्वेदनं काले यवाग्वस्तिक्तको रसः । पाचनान्यविपक्वानां दोषाणां तरुणे ज्वरे । आसप्तरात्रं तरुणं ज्वरमाहुर्मनीषिणः । मध्यं द्वादशरात्रन्तु पुराणमत उत्तरम् । पाचनीयं शमनीयं कषायं पाययेत् तु तम् । ज्वरितं षडहेऽतीते लघ्वन्नं प्रतिभोजयेत् । सप्ताहात् परतोऽस्तब्धे सामे स्यात् पाचनं ज्वरे । निरामे शमनं स्तब्धे सामे नौषधमाचरेत् । लालाप्रसेको हृल्लासहृदयाशुद्ध्यरोचकाः । तन्द्रालस्याविपाकास्यवैरस्यं गुरुगात्रता । क्षुन्नाशो बहुमूत्रं च स्तब्धता बलवान् ज्वरः । आमज्वरस्य लिङ्गानि न दद्यात् तत्र भेषजम् । भेषजं ह्यामदोषस्य भूयो ज्वलयति ज्वरम् । मृदौ ज्वरे लघौ देहे प्रचलेषु मलेषु च । पक्वं दोषं विजानीयाज्ज्वरे देयं तदौषधम्" ।

तेन ज्वरो नानाविधः ऐकाहिकादिः नवज्वरः जीर्णज्वरः विषमज्वरादिश्च उक्तवाक्येभ्यो ज्ञेयः ।

नक्षत्रभेदे ज्वरोत्पत्तौ मृत्युतद्रोगकालभेदाः मुहूर्त्तचि० पी० धा० उक्ता यथा

"स्वातीन्द्रपूर्व्वाशिवसार्पभे मृतिर्ज्वरेऽन्त्यमैत्रे स्थिरता भवेद्रुजः । याम्यश्रवोवारुणतक्षभे शिवाघस्रा हि पक्षो द्विधिपार्कवासवे । मूलाग्निदास्रे नव पित्र्यभे नखा बुध्न्या-